खेदः, पुं, ( खिद्+भावे घञ् । ) शोकः । इति हेमचन्द्रः ॥ अवसन्नता । इति जटाधरः ॥ ( यथा, रामायणे । ४ । ४६ । ७ ।
"यदापीदं वनं दुर्गं विचिन्वन्तु वनौकसः ।
खेदं त्यक्त्वा पुनः सर्व्वं वनमेव विचिन्वताम् ॥")

खेदिनी, स्त्री, (खिद्+णिच्+णिनिः । स्त्रियां ङीप् ।) अश्मपर्णौवृक्षः । लता । इति शब्दचन्द्रिका ॥ (देयकारिणी । शोककारिणी ॥ इति व्युत्पत्तिलब्धोऽर्थः ॥)

खेयं, क्ली, (खन्यते इति । खनु विदारे+"ई च खनः ।"३ । १ । १११ इति कर्म्मणि क्यप् ईकारश्चान्तादेशः ।) परिखा । गड़खाइ इति भाषा । इत्यमरः ॥ खननीयम् । इति व्याकरणम् ॥ (सेतुभेदः । यथा मिताक्षराधृतनारदवचनम् ।
"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च ।
तोयप्रवर्त्तनात् खेयः ।" इति ॥)

खेल, ऋ चाले । गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-चलने अकं गत्यां सकं-सेट् ।) कवर्गद्वितीयादिः । अचिखेलत् । चालः कम्पः । चालः केचिन्न मन्यते । इति दुर्गादासः ॥

खेलनं, क्ली, (खेल्+भावे ल्युट् ।) क्रीड़नम् । इति हलायुधः ॥ (यथा, गीतगोविन्दे । १ । ४१ ।
"कापि विलासविलोलविलोचन-
खेलनजनितमनोजम् ॥")

खेलनी, स्त्री, ( खेलति अस्मिन् इति । खेल+अधिकरणे ल्युट्+स्त्रियां ङीप् । ) शारिफलम् । इति हेमचन्द्रः ॥

खेला, स्त्री, (खेल+भावे+अप् टाप् ।) खेलनम् । तत्पर्य्यायः । क्रीड़ा २ कूर्द्दनम् ३ । इत्यमरः । १ । ७० । ३३ ॥

खेलिः, स्त्री, (खे आकाशे अलति पर्य्याप्नोति । अल+इन् ।) गीतम् । वाणः । सूर्य्यः । पक्षी । जन्तुः । इत्यजयपालः ॥

खेव, ऋ ङ सेवे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ऋदित् ।) ऋ, अचिखेवत् । ङ, खेवते । इति दुर्गादासः ॥

खेसरः,पुं,(खे आकाशे इव द्रुतगामित्वात् सरतीति । सृ+टः ।) जन्तुविशेषः । खचर इति भाषा । तत्पर्य्यायः । अश्वखरजः २ सक्तद्गर्भः ३ अध्वगः ४ वामी ५ सन्तुरः ६ मिश्रजः ७ मिश्रशब्दः ८ अतिभारगः ९ । इति राजनिर्घण्टः ॥

खै, स्थैर्य्ये । खनने । हिंसायाम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-स्थैर्य्ये अकं-खननादौ सकं-अनिट् ।) खायति । इति दुर्गादासः ॥

खोङ्गाहः, पुं, ( खे आकाशे उङ् इत्यव्यक्तशब्दं कुर्व्वन् गाहते इव प्रधावतीत्यर्थः । गाह+अच् । पृषोदरात् साधुः । ) श्वेतपिङ्गलाश्वः । इति हेमचन्द्रः ॥ खाङ्गाहोऽपि पाठः ॥

खोट, ऋ गत्याघाते । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) ऋ, अचुखोटत् । गत्याघातः खोटनम् । खोटति खञ्जः । इति दुर्गादासः ॥

खोट, त् क क्षेपे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) अचुखोटत् । इति दुर्गादासः ॥

खोटिः, स्त्री, ( खोट्+इन् । ) चतुरा स्त्री । इति शब्दमाला ॥ खोरिरित्यपि पाठः ॥

खोटी, स्त्री, ( खोटि+वा ङीष् । ) पालङ्कीद्रव्यः । इति शब्दचन्द्रिका ॥ चतुरापि ॥

खोड़, ऋ खोटने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् । ) ऋ, अचुखोड़त् । खोड़ति खञ्जः । रमानाथस्तु खोड़ति बाला क्रिमिमित्युदाहृतवान् । इति दुर्गादासः ॥

खोड़, त् क क्षेपे । इति कविकल्पद्रुमः ॥ ( अदन्त-चुरां-परं-सकं-सेट् । ) अचुखोड़त् । इति दुर्गादासः ॥

खोड़ः, त्रि, ( खोड़ति इति । खोड़+अच् । ) खञ्जः । खोँड़ा इति भाषा ॥ इत्यमरः ॥२।६।४६॥

खोड़कशीर्षकं, क्ली,( खोड़ क्षेपे+ण्वुल् । खोड़कं शीर्षं अस्य इति कप् । ) कपिशीर्षम् । क्रयशीर्षम् । इति त्रिकाण्डशेषः ॥

खोर, ऋ खोटने । गतिवैकल्ये इति यावत् । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) ऋ, अचुखोरत् । खोरति खञ्जः । इति दुर्गादासः ॥

खोरः, त्रि, ( खोरति इति । खोर्+अच् । ) खञ्जः । इति हेमचन्द्रः ॥

खोल, ऋ खोटने । गतिवैकल्ये । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-अकं-सेट् । ) ऋ, अचुखोलत् । खोलति खञ्जः । रमानाथस्तु खोलति बाला क्रिमिमित्युदाहृतवान् । इति दुर्गादासः ॥

खोलः, त्रि, ( खोलति इति । खोल+अच् । ) खञ्जः । इति शब्दमाला ॥

खोलकः, पुं, ( खोल+संज्ञायां कन् । ) पाकः । खोला इति भाषा ॥ शिरस्त्रः । खोपड़ा इति भाषा ॥ वल्मीकः । उयेर ढिपि इति भाषा ॥ पूगकोषः । इति मेदिनी ॥ गुयार छोवड़ा इति भाषा ॥

खोलिः, स्त्री, ( खोल+इन् । ) तूणः । इति शब्दमाला ॥

खोल्मुकः, पुं, ( खे आकाशे उल्मुक इव लोहितवर्णत्वयेति बोध्यम् । ) मङ्गलग्रहः । इति त्रिकाण्डशेषः ॥

ख्या, ल ख्यातौ । कथने । इति कविकल्पद्रुमः ॥ ( अदां-परं-अकं-कथनादौ तु सकं-अनिट् । ) ख्यातिः प्रसिद्धिः । ल, ख्याति गुणी प्रसिद्धः स्यादित्यर्थः । ख्याति साधुः कथां हरेः । तथा च । ख्या प्रकथने । प्रकथनं प्रसिद्धिरिति गोविन्दभट्टः । ख्या प्रकथने इति चतुर्भुजजुमरौ । इति दुर्गादासः ॥

ख्यातः, त्रि, ( ख्या+क्तः । ) ख्यातियुक्तः । तत्पर्य्यायः । प्रतीतः २ प्रथितः ३ वित्तः ४ विज्ञातः ५ विश्रुतः ६ । इत्यमरः ।३ । १ । ८ ॥ ( यथा, भट्टिः । ६ । ८७ ।
"अमितमप्यचमीशानं सर्व्वभोगीणमुत्तमम् ।
आवयोः पितरं विद्धि ख्यातं दशरथं भुवि ॥")

ख्यातगर्हणः, त्रि, ( ख्याता विश्रुता गर्हणा निन्दा अस्य । ) प्रसिद्धकुत्सनः । तत्पर्य्यायः । अवगीतः २ । इत्यमरः । ३ । १ । ६३ ॥

ख्यातगर्हितः, त्रि, (ख्यातं गर्हितं गर्हणमस्य ।) ख्यातगर्हणः । इति जटाधरः ॥

ख्यातिः, स्त्री, ( ख्या+क्तिन् । ) प्रसिद्धिः । तत्पर्य्यायः । प्रथा २ । इत्यमरः । ३ । २ । ६ ॥ ( यथा, पञ्चतन्त्रे । १ । ४०२ । [यतः ।"
"लोके ख्यातिमुपागताऽत्र सकले लोकोक्तिरेषा मनुष्य । १२ । ३६ । [पुष्कलाम् ।
"येनास्मिन् कर्म्मणा लोके ख्यातिमिच्छति
न च शोचत्यसम्पत्तौ तद्विज्ञेयन्तु राजसम् ॥"
प्रकाशः । ज्ञानम् । यथा, माघे । ४ । ५५ ।
"मैत्र्यादिचित्तपरिकर्म्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः ।
ख्यातिं च सत्त्वपुरुषान्यतयाऽधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम् ॥"
"मैत्रीति । इहाद्रौ समाधिभृतो योगिनः । मैत्री करुणा मुदिता उपेक्षेति चतस्रश्चित्तवृत्तयः । तत्र पुण्यकृतसु मैत्री दुःखिषु करुणा सुखिषु मुदिता अनुमोदनं पापिषु उपेक्षा । मैत्री आदिर्येषां तानि चित्तस्य परिकर्म्माणि प्रसाधकानि शोधकानीत्यर्थः तानि विन्दन्ति लभन्ते इति तद्विदः तद्भाजस्ते: क्षीणान्तःकरणमलाः इत्यर्थः । अतएव क्लेशप्रहाणं विधाय । अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः । तत्रानित्येषु नित्यत्वाभिमानः अनात्मनि च देहेन्द्रियादौ आत्मधीरित्यादि विभ्रमोऽविद्या । अस्मिता अहङ्कारः । रागोऽभिमतविषयाभिलाषः । द्वेषोऽनभिमतविषयेषु रोषः । अभिनिवेशः । कार्य्याकार्य्येष्वाग्रहः । ते हि पुरुषं क्लिश्यन्ति इति क्लेशाः क्लेशहेतवः तेषां प्रहाणं क्षयः तद्विधाय क्लेशान् हित्वा इत्यर्थः । अतो लब्धः सबीजः सावलम्बयोगो यैस्ते लब्धसबीजयोगाः सन्तः आलम्बनमेव यनक्ति । सत्त्वपुरुषयोरन्यतया अन्यत्वेन मिथो भिन्नत्वेन ख्यातिं ज्ञानं अधिगम्य प्रकृतिपुरुषौ भिन्नाविति ज्ञात्वा प्रकृतिपुरुषयोर्विवेकाग्रहणात् संसारः । विवेकग्रहणात् मुक्तिरिति साङ्ख्याः । अथ तां ख्यातिमपि निरोद्धुं निवर्त्तयितुं वाञ्छन्ति हत्तिरूपां तां निवर्त्त्य स्वयम्प्रकाशतयैवावस्थातुमिच्छन्तीत्यर्थः । प्रकृताद्युपरतायां पुरुषस्वरूपेणावस्थानं मुक्तिरिति साङ्ख्यसिद्धान्तः ॥" इति तट्टीकायां मल्लिनाथः ॥)